# ॥ श्रीनारायणापराधक्षमापनस्तोत्रम् ॥

अहं मूढो मोहावृतचलितचित्तोऽतिजडधी: ।
महामायाग्रस्तश्च मकरमुखाङ्घ्रिर्गज इव ॥
कृपा तेऽश्मानं वै विमलकनकं चैव कुरुते ।
अतोऽहं प्रामुं तां तव चरणसेवारतमना: ॥ १ ॥
न मे श्लाघ्या वाणी श्रवणमधुरा नारदसमा ।
तथा भक्तो नाहं पवनसुतरामप्रिय इव ॥
तपोवृद्धो नाहं तव परमभक्तो ध्रुवसम: ।
परं श्रोतव्योऽहं तव भजनमार्गाध्वग इति ॥ २ ॥
न वेत्तुं त्वां शक्य: सुरपतिरपीन्द्र: शतमख: ।
स्वरूपं ते वक्तुं कमलजभवौ चापि ह्यबलौ ॥
यतोऽनन्तोऽपारोऽसि च गहनवेद्यश्च पुरुष: ।
पुरस्ते त्वां स्तोतुं मशक इव सूक्ष्मोऽस्मि वृजिन: ॥ ३ ॥
त्वया सृष्टं विश्वं गगनरविलोकत्रययुतम् ।
सुरा मित्रा रुद्रा: सकलवसवश्चैव पितर: ॥
ध्रुवाधारस्तेषां ह्यखिलनरवन्द्योऽसि प्रणव: ।
महद्दुष्प्राप्यं वै तव परमपूज्यं पदयुगम् ॥ ४ ॥
त्वया जातो ब्रह्मा सृजति निखिलं यश्च पयसा ।
महादेव: ख्यात: खलु जगति रामेश इति च ॥
स्वयं वैकुण्ठेशस्त्वमसि मम माता गुणनिधि: ।
अत: क्षन्तव्योऽहं तव चरणपद्मागतनत: ॥ ५ ॥
ऋषीणामानन्दस्तव मुदितमास्यं ह्यनुपमम् ।
उरस्ते श्रीस्थानं कुपितभृगुपादाङ्कितमपि ॥
गदी चक्री शार्ङ्गी त्वमसि निजभक्ताभयकर:।
समीचीनं ह्येतद्भवतरणमेकं तव पदम् ॥ ६ ॥
गणेशो विघ्नेश: कुशलपरशुधारी गजमुख: ।
महाशक्त्या: पुत्र: सुमतिगतिदाता शिवसुत: ॥
गणेशो मेधावी कलिकलुषनाशी शुभकर: ।
तवैवाद्यं रूपं धवलवसनं क्लेशहरणम् ॥ ७ ॥
वरान्धात्रा लब्ध्वा त्रिपुरभुवनं विस्मयकरम् ।
बभूवुर्ये दैत्या अमरनरनाशोत्सुकखला: ॥
तदा तेषां काल: पशुपतिशरस्त्वं ह्यजगवे ।
अतस्तापान्हन्तुं त्वमसि च वरं नान्यशरणम् ॥ ८ ॥
अहिल्यादेवस्त्वं ह्यमितरवितेजा रघुवर: ।
तथा कृष्ण: श्यामश्च नृगगतिदाताऽर्जुनसखा ॥
सदा धर्माध्यक्षस्त्वमसि शिवहृद्देवभगवान् ।
त्वमेवैकाधारो विकलहतधैर्यस्य च किल ॥ ९ ॥
त्वदीय: सच्छिष्यस्त्रिभुवनघृणिर्भास्कर इति ।
त्वया शक्त्या शेष: शिरसि धृतवांश्चैव धरणीम् ॥
तवाङ्घ्रिभ्यां स्पृष्टा ह्यपनयति दोषान्सुरसरित् ।
ऋते त्वद्देवेशात्किमपि न च साध्यं क्वचिदपि ॥ १० ॥
सुपर्णासीनस्त्वं ह्यधिप इवरक्षाकरहरि: ।
सदा श्रद्धाशुल्को विपुलधनयुक्तश्च कृपण:॥
शुभंयुस्त्वं विष्णु: शरणदपरेश: सकरुण: ।
बृहद्दुष्प्रेक्ष्यस्त्वं दशशतकरैर्भूषितपुमान् ॥ ११ ॥

क्षमस्वापराधं प्रभो शेषशायिन् । क्षमस्वापराधं रमापूजिताङ्घ्रे ॥
क्षमस्वापराधं च गोलोकनाथ । क्षमस्वापराधं हरे वासुदेव ॥
मनसा वचसा वाऽपि शरीरावयवैस्तथा । मया कृतानि पापानि नाशय पुरुषोत्तम ॥
नाहं वेद्मि च ते रूपं ज्ञानमाम्नायवैभवम् । परं वेद्मि विधेयं वै भक्त्या ते चरणार्चनम् ॥
अत एव जगन्नाथ क्षमां कुरु कृपानिधे । सर्वदा तावकं पुण्यं स्मरणं देहि केशव ॥

**- डॉ. पुष्कराज उदय वर्तक, 2/7/2015.**

डॉ. पुष्कराज उदय वर्तक cell no.9969020588 pushkarajgem@gmail.com